# उपनिषद्विचारावाहिनी श्रीज्ञानेश्वरी

प्रा. डॉ. विभा क्षीरसागर

श्रीज्ञानदेवविरचित' :ज्ञानेश्वरी' इति विशाल: ग्रन्थ: मराठीवाङ्मये अमूल्यं रत्नमेव। श्रीमद्भगवद्गीताज्ञानं सामान्यजनानां कृते व्यावहारिकदृष्टान्तै: ज्ञापयित्वा उपकृतोऽयं लोक: सन्तवरेण भगवद्रूपेण श्रीज्ञानदेवेन। भगवत्या: सरस्वत्या: पुत्र: ज्ञानदेव: तन्मुखात् प्रसृतेयं ज्ञानगङ्गा वैदिकविचारानेव प्रवहति। ज्ञानेश्वर्याम् आरम्भत: एव उपनिषद्विचारदर्शनं भवति। 'श्रीज्ञानेश्वर्याम् उपनिषद्विचार': इत्येष: महाविषय:। उपनिषद्विचारवातोल्लासिता इव प्रतिभाति श्रीज्ञानेश्वरी। विषयस्यास्य व्याप्तिमवगम्य अत्र ज्ञानेश्वर्यां प्रथमाध्यायस्याधारेणैव विषयप्रस्तुति: क्रियते।

वैदिकवाङ्मयं प्रमाणमिति मन्यमाना: जना: 'शिष्टा:'।

समाप्तिकामो मङ्गलमाचरेत्' इत्यस्ति शिष्टसम्प्रदाय:। श्रीज्ञानदेवोऽपि एनमेव सम्प्रदायमनुसरति इति स्पष्टं दृश्यते ज्ञानेश्वर्याम्।

**ओम् नमोजी आद्या। वेदप्रतिपाद्या। जय जय स्वसंवेद्या। आत्मरूपा॥**[१]

अत्र श्रीज्ञानदेव: ओङ्कारस्वरूपम् इत्युक्ते सृष्टे: कारणं प्रणमति।

Mobile : 96577 67396 E-mail : vibhakshirsagar@rediffmail.com

प्रश्नोपनिषदि पञ्चमे प्रश्ने पिप्पलादमुनि: सत्यकामं वदति, **'हे सत्यकाम! परं चापरं ब्रह्म यदोङ्कार:'** इति।

ओङ्कारो आलम्बनं ब्रह्मण: इत्यस्ति शाङ्करभाष्यं पिप्पलादमुनिवचनविषये।

उपनिषद्प्रतिपाद्यविषय: ओङ्कार: एव। माण्डूक्योपनिषदि

**'युञ्जीत प्रणवे चेत: प्रणवो ब्रह्म निर्भयम्।**

**प्रणवे नित्ययुक्तस्य न भयं विद्यते क्वचित्॥**

इति ओङ्कारमाहात्म्यवर्णनमस्ति।

ज्ञानदेवोऽपि वेदप्रतिपाद्यम् ओङ्कारं प्रथमं प्रणमति। ओङ्कारं वर्णयता तेन ओङ्कारस्य' स्वसंवेद्यम्' इति वैशिष्टयमपि बोधितम्।

**नायमात्मा प्रवचनेन लभ्यो**

**न मेधया न बहुना श्रुतेन।**

**यमेवैष वृणुते तेन लभ्य**

**स्तस्यैष आत्मा विवृणुते तनुं स्वाम्॥**[२]

विद्वान् यं परमात्मानं प्राप्तुमिच्छति स: परमात्मा अध्यापनेन, धारणाशक्त्या अथवा मेधया न लभ्यते। परमात्मानं प्राप्तुं या इच्छा तया इच्छया एव तस्य प्राप्ति:। ओङ्कारम् इत्युक्ते परमात्मानं प्राप्तुकामस्य पुरत: एष: परमात्मा आविर्भवति अथवा स्वस्वरूपं प्रकटयति। इत्याशयोऽस्ति आत्मा ज्ञानस्वरूपोऽस्ति। ज्ञानवृत्त्या एव तस्य ज्ञानम्। एतदेवास्ति तस्य

'स्वसंवेद्यत्यम्'। आत्मलाभप्रार्थनैवात्मलाभसाधनम् इति सूचयति शङ्कराचार्य:।

**अकार चरण युगुल। उकार उदर विशाल।**

**मकार महामण्डल। मस्तकाकारे॥**

**हे तिन्ही एकवटले। तेथ शब्दब्रह्म कवळले।**[३]

एतासु पङ्क्तिषु ओङ्कारस्य मात्रात्रयं प्रकाशितम् । अ उ म इति त्रिमात्राविशिष्टपरमात्मरूपं प्रतिपादितं श्रीज्ञानदेवेन।

**प्रश्नोपनिषद्प्रतिपाद्यमस्ति एतत्।**

**य: पुनरेतं त्रिमात्रेणोमित्येते नैवाक्षरेण**

**परं पुरुषमभिध्यायीत स तेजासि सूर्ये सम्पन्न:।**[४]

अत्र त्रिमात्राविषयविज्ञानविशिष्टेन प्रतीकेनाभिध्यायीत इति त्रिमात्राविशिष्टमोङ्कार-माहात्म्यं वर्णितमस्ति प्रश्नोपनिषदि पञ्चमे प्रश्ने।

'हे तिन्ही एकवटले तेथ शब्दब्रह्म कवळले।' इत्यस्मिन् ज्ञानेश्वरकृतवर्णने अ उ म त्रिमात्रायुतोङ्कार: एव शान्तमजरममरमभयं परं ब्रह्म इति उपनिषद्विचार: एव दृश्यते।

**तमोङ्कारेणैवायतनेनान्वेति विद्वान्**

**यत्तच्छान्तमजरममृतमभयं परं चेति।**[५]

इत्यस्मिन् मन्त्रे एष: एव विचार: प्रकटित:।

**ओमितीदं सर्वम्।**[६]

इत्यस्मिन् मन्त्रेऽपि स एव विचार:।

ओमितीदं सर्वं हि शब्दरूपमोङ्कारेण व्याप्तम्। इत्याशयोऽस्ति ओङ्कार: एव सृष्टे: आदिबीजम्। ओङ्कारोपासनया एव आनन्दप्राप्ति: अथवा भगवत्कार्यपूर्ति: इति विश्वसिति ज्ञानदेव:। अत एव ग्रन्थारम्भे त्रिमात्राविशिष्टमोङ्कारं प्रणमति स:।

श्रीज्ञानेश्वरमहाराज: ओङ्कारं प्रणम्य सद्गुरुं स्तौति। ज्ञानेश्वर्यामखण्डप्रवाह: गुरुभक्त्या:।

**मज हृदयी सद्‌गुरु। जेणे तारिलो हा समुद्रपूरु।**

**म्हणऊनि विशेषे अत्यादरु। विवेकावरी॥**[७]

मायारूपसंसारसागराद्रातोऽहं येन स: सद्गुरु: मम हृदि तिष्ठति। अत एव मम आदर: विवेके।

**म्हणोनि जाणतेने गुरु भजिजे।**

**तेणे कृतकार्य होईजे।**

**जैसे मूळसिंचने सहजे।**

**शाखापल्लव संतोषती॥**[८]

वृक्षाणां मूलसिञ्चनं यथा वृक्षवर्धकं तथैव सद्गुरुभजनमस्ति भगवत्कार्य-सम्पादकम्। स्वतन्त्रबुद्धया गीतार्थस्य आकलनमशक्यम्। परन्तु गुरुरूपाधारेण तच्छक्यम्। तेनैव गीतार्थं वच्मीति वदति सन्तश्रेष्ठज्ञानेश्वर:। यथा लोहस्य सुवर्णे परिवर्तनं परिसस्पर्शेणैव अथवा अमृतयोगेन मृतोऽपि

जीवति अथवा कलापुरुषमुखे यदि सरस्वत्या: वास: तर्हि सोऽपि पण्डित: इव भाषते।

**परी एथ असे एक आधारू। तेणेचि बोले मी सधरू।**

**जै सानुकूळ गुरू। ज्ञानदेवो म्हणे।**

**लोहाचे कनक होये। हे सामर्थ्य परिसीच आहे।**

**का मृतही जीवित लाहे। अमृतसिध्दी॥**

**जरी प्रकटे सिद्ध सरस्वती। तऱ्ही मुकया आथि भारती।**

**एथ वस्तु सामर्थ्यशक्ती। नवलकायी॥**[९]

उपर्युक्तज्ञानेश्वरीविचार: उपनिषद्विचार: एव।

**यं यं लोकं मनसा संविभाति**

**विशुद्धसत्त्व: कामयते यांश्च कामान्।**

**तं तं लोकं जायते तांश्च कामा-**

**स्तस्मादात्मज्ञं ह्यर्चयेत् भूतिकाम:॥**[१०]

आत्मवेत्ता विशुद्धमनसा यं यं लोकं कामयते अथवा यान् यान् भोगानिच्छति, तं तं लोकम् अथवा तान् तान् भोगान् स: प्राप्नोति। अत: विभवेच्छुना आत्मज्ञानी पूजनीय:।

**पातञ्जलयोगदर्शने विशुद्धसत्त्वस्य लक्षणमस्ति 'अविद्यास्मितारागद्वेषाभिनेवेशा: पञ्चक्लेशा:'।**[११]

एते पञ्चक्लेशा: यस्य क्षीणा: स: विशुद्धचित्त: अथवा निर्मलचित्त:।

विशुद्धचित्त: यदिच्छति तत् प्राप्नोति। अत: शङ्कराचार्य: वदति' तस्माद्विदुष: सत्यसङ्कल्पत्वादात्मज्ञमात्मज्ञानेन विशुद्धान्त:करणं ह्यर्चयेत्। पूजयेत्पादप्रक्षालनशुश्रूषानमस्कारादिभि: भूतिमिच्छु:। तत् पूजार्ह: एवासौ।

**उपासते पुरुषं ये ह्यकामा -**

**स्ते शुक्रमेतदतिवर्तन्ति धीरा:।**[१२]

तमाज्ञं पुरुषं ये हि अकामा: तृष्णावर्जिता मुमुक्षुव: सन्त: उपासते परमिव सेवन्ते ते शुक्रं नृबीजं यदेतत्प्रसिध्दं शरीरोपादानकारणम् अतिवर्तन्ति धीमन्त: न पुनर्योनिं प्रसर्यन्ति। अत: तं पूजयेत्। आत्मज्ञ: इत्युक्ते सद्गुरु: उपनिषदि वर्णित: अस्ति। भूतिकाम: इत्यस्य आशय: अस्ति कल्याणेच्छु:। श्रीज्ञानदेव: संस्कृते भगवदुपदेश: सामान्यजनकल्याणाय वक्तुमिच्छति। भगवदुपदेश: सामान्यजनान् प्रति प्रापणीय: इत्यस्ति एकं भगवत्कार्यम्।

श्रीमद्भगवद्गीतायां

**य इमं परमं गुह्यं मद्भक्तेष्वभिधास्यति।**

**भक्तिं मयि परां कृत्वा मामेवैष्यत्यसंशय:॥**

**न च तस्मान्मनुष्येषु कश्चिन्मे प्रियकृत्तम:।**

**भविता न च मे तस्मादन्य: प्रियतरो भुवि॥**[१३]

इति भगवता एव कथितम्। भगवत्कार्यमेतत् गच्छतु पूर्णत्वम् इत्यर्थं श्रीज्ञानेश्वरमहाराज: सद्गुरुं स्तौति। यत: गुरुकृपां विना कार्यमेतत् नैव

सम्पूर्णतां याति इति ज्ञात्वा सद्गुरु: प्रथमं वन्द्य: इति उपनिषद्विचारमनुसरति श्रीज्ञानदेव:।

**केनोपनिषदि यक्षोपाख्यानस्य एतदेवास्ति सारम्।**

**ब्रह्म ह देवेभ्यो विजिग्ये। तस्य ह ब्रह्मणो विजये देवा अहमीयन्त।**[१४]

अस्माकं विजय: इति देवेषु गर्व:। ब्रह्म व्यजानादेतत्। तत्र ब्रह्म प्रादुर्षभूव। परन्तु देवा: तन्न व्यजानत किमिदं यक्षमिति। ते अग्निमब्रुवन् "जातवेद! एतद्विजानीहि किमिदमिति। अग्नि यक्षसमीपं गत:। यक्षेण किं वीर्यं त्वयि इति पृष्टे सति सर्वं दहेयमिति उक्तमग्निना। तदा एतत् तृणं निदधाव इति आदिशत् यक्ष:। अग्नि: तन्न दग्धुं शशाक। एवमेव वायुविषयेऽपि सञ्जातम्। तदनन्तरम् देवता: इन्द्रम् अब्रुवन् त्वमेतद्विजानीहीति। तदा यक्ष: तस्मादिन्द्रात् तिरोदधे। अग्निना वायुना च सह यक्षेण संवदितम्। परन्तु यक्षेण इन्द्रस्य कृते संवदितुम् अवसरोऽपि न कल्पित:। इन्द्रस्येन्द्रत्वाभिमानं निराकर्तुं स: संवादमात्रमपि नादाद्ब्रह्मेन्द्राय। परन्तु इन्द्र: यस्मिन्नाकाशे यक्ष: तिरोदधे तत्र गत:। तत्र स: बहुशोभमानाम् उमां हैमवतीम् अपश्यत्। तां स: अपृच्छत् किमेतद्यक्षमिति। तस्येन्द्रस्य यक्षे भक्तिं बुद्ध्वा विद्या उमारूपिणी प्रादुरभूत्स्त्रीरूपा। स: इन्द्र: ताम् उमां बहुशोभमानां शोभनतमां विद्यां इति ज्ञातवान्। सा विद्यादेवी स्पष्टीकृतवती ब्रह्मणो वा एतद्विषये महीयध्वमिति। तत: इन्द्र: विदाञ्चकार ब्रह्मेति। ईश्वरेणैव जिता: असुरा:। देवा: तत्र केवलं निमित्तमात्रम्। विजयस्य कारणं तु ईश्वर: एव। एतत् तस्यैव

सामर्थ्यम्।

**एथ वस्तु सामर्थ्यशक्ति। नवलकायी।**[१५]

ज्ञानदेवस्य वचनमिदमस्ति सारं यक्षोपाख्यानस्य।

' ईश्वरेच्छया तृणमपि वज्रीभवति' इति कथयता शङ्कराचार्येणापि एतदेव सूचितम्।

श्रीमद्भागवते

**सोऽहं नृपेन्द्र रहित: पुरुषोत्तमेन**

**सख्या प्रियेण सुहृदा हृदयेन शून्य:।**

**अध्वन्युरुक्रमपरिग्रहमङ्ग रक्षन्**

**गोपैरसद्भिरबलेव विनिर्जितोऽस्मि।**[१६]

यस्याश्रयेण मया मत्स्यवेश्ध: कृत:, इन्द्रं विजित्य अग्नये खाण्डववनं समर्पितं, भीमसेनोऽपि यस्याश्रयेण जरासन्धं घातितवान्, वनवासे दशसहस्रशिष्यै: सह भोजनाय सम्प्राप्तेन दुर्वासमुनिना वयं यदा सङ्कटे पातिता: तदा द्रौपद्या: स्थालिकायां लग्नेन एकेन शाकपर्णनिमित्तेन येन वयं रक्षिता: स: भगवान् श्रीकृष्ण: स्वधामप्राप्त:।

**तद्वै धनुस्त इषव: स रथो हयास्ते**

**सोऽहं रथी नृपतयो यत आमनन्ति।**

**सर्वं क्षणेन तदभूदसदीशरिक्तं**

**भस्मन् हुतं कुहकराद्धमिवोप्तमूष्याम्॥**[१७]

भागवतवर्णनेऽस्मिन्नापि

**एथ वस्तुसामर्थ्यशक्ती। नवलकायी।**

एष: एव विचार: प्रकाशित:।

ज्ञानेश्वरी' विशालग्रन्थोऽस्ति। ग्रन्थेऽस्मिन् सर्वत्र वैदिकविचार-प्रकटनमेव। दीर्घ: एष: विचार: संक्षिप्तरूपेण प्रथमाध्यायाधारेणैव प्रस्तुत:।

उपर्युक्तविवेचनेन स्पष्टीभवति यत् श्रीज्ञानदेवमहाराजविरचितज्ञानेश्वरी उपनिषद्विचारवाहिनी पवित्रज्ञानगङ्गाधारास्ति।

**सन्दर्भसूचि :**


१. ज्ञानेश्वरी १.१

२. माण्डूक्योपनिषद् ३.२.३

३. ज्ञानेश्वरी १.१९,२०

४. मुण्डकोपनिषद् २.२.६

५. प्रश्नोपनिषद् ५.७

६. तैत्तिरीयोपनिषद् ८.१

७. ज्ञानेश्वरी १.२२

८. ज्ञानेश्वरी १.२५

९. ज्ञानेश्वरी १.७५, ७७, ७८

१०. मुण्डकोपनिषद् ३.१.१०

११. पातञ्जलयोगदर्शनम् २.३

१२. मुण्डकोपनिषद् ३.२.१

१३. श्रीमद्भगवद्गीता १८.६८, ६९

१४. केनोपनिषद् ३.१

१५. ज्ञानेश्वरी १.७८

१६. केनोपनिषद् शाङ्करभाष्य पृ. १४६

१७. श्रीमद्भागवत १.१५.२०